**अभ्यास-प्रश्नपत्रम् - 2020-21 (Set -4)**

**कक्षा - दशमी**

**संस्कृतम् (कोड-122)**

**समयः – होरात्रयम्** **सम्पूर्णाङ्काः – 80**

**सामान्यनिर्देशाः-**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रश्नाः सन्ति।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम्-**

**'अ' - भागः (बहुविकल्पात्मकः) 40 अङ्काः**

**'आ' - भागः (वर्णनात्मकः) 40 अङ्काः**

(i) अस्मिन् प्रश्नपत्रे द्वौ भागौ स्तः।

(ii) 'अ' - भागः बहुविकल्पात्मकः अस्ति।

(iii) 'आ' - भागः वर्णनात्मकः अस्ति।

(iv) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(v) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(vi) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**'अ'-भागः 40 अङ्काः**

**(बहुविकल्पात्मकाः प्रश्नाः)**

| | **अनुप्रयुक्त-व्याकरणम्** | |
|---|---|---|
| **1.** | **अधोलिखितेषु रेखांकितपदानां सन्धिपदं सन्धिच्छेदपदं वा चिनुत –**<br>(केवलं प्रश्नचतुष्टयम्)<br>(i) यानानां पङ्क्तयो **ह्यनन्ताः** कठिनं संसरणम्।<br>(क) ह्य + नन्ताः (ख) हि + अन् + अन्ताः (ग) हि + अनन्ताः<br>(ii) पश्चाद् अन्यो द्वितीयः **कश्चिल्लक्ष्यते**।<br>(क) कश्चिल् + लक्ष्यते (ख) कः + चित् + लक्ष्यते (ग) कश्चित् + लक्ष्यते<br>(iii) **इति + उक्त्वा** धाविता तूर्णं व्याघ्रमारी भयङ्करा।<br>(क) इत्यूक्त्वा (ख) इत्युक्त्वा (ग) इत्योक्त्वा<br>(iv) **सुरभेः** + **इमाम्** + **अवस्थाम्** दृष्ट्वा सुराधिपः तामपृच्छत्।<br>(क) सुरभेर् + इमाम् + अवस्थाम् (ख) सुरभेः + इमा + अम् + अवस्थाम्<br>(ग) सुरभेः + इमाम् + अवस्थाम् | **1x4=4** |

| | | |
|---|---|---|
| | (v) तत्र **निहितामेकां** मञ्जूषाम् आदाय पलायितः।<br>(क) निहि + ताम् + एकाम् (ख) निहिताम् + एकाम् (ग) निहिता + मेकाम् | |
| **2.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत-** (केवलं प्रश्नचतुष्टयम्)<br>(i) अतिथिः **चौरशंकया** तमन्वधावत् अगृह्णाच्च।<br>(क) चौरात् शंकया (ख) चौरस्य शंकया (ग) चौरया शंकया<br>(ii) पक्षिणः **हर्षमिश्रितं** कलरवं कुर्वन्ति।<br>(क) हर्षस्य मिश्रितम् (ख) हर्षेण मिश्रितम् (ग) हर्षात् मिश्रितम्<br>(iii) व्याघ्रोऽपि सहसा नष्टः **गलबद्धश्रृगालकः**।<br>(क) गले बद्धे श्रृगालकः (ख) गले बद्धः श्रृगालकः (ग) गले बद्धश्रृगालकः<br>(iv) **कज्जलमलिनं** धूमं मुञ्चति शतशकटीयानम्।<br>(क) कज्जलेन मलिनम् (ख) कज्जलम् इव मलिनम् (ग) कज्जलात् मलिनम्<br>(v) इत्युक्त्वा धाविता तूर्णं **व्याघ्रमारी** भयङ्करा।<br>(क) व्याघ्रस्य मारी (ख) व्याघ्रं मारयति इति (ग) व्याघ्रः मारयति इति | **1x4=4** |
| **3.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) राजसिंहः **बुद्धिमान्** राजपुत्रः आसीत्।<br>(क) बुद्धि + मतुप् (ख) बुद्धि + वतुप् (ग) बुद्धि + मान्<br>(ii) अधोलिखितेषु शब्देषु कः **टाप्** प्रत्ययान्तः नास्ति?<br>(ख) दृष्टा (ग) धाविता (ग) चपेटा<br>(iii) जम्बुकः – स्वामिन्! यत्रास्ते सा **धूर्त** + **टाप्** तत्र गम्यताम्।<br>(क) धूर्त (ख) धूर्ता (ग) धूर्तत्व<br>(iv) अधोलिखितेषु शब्देषु कः **टाप्** प्रत्ययान्तः?<br>(क) माला (ख) रमणीया (ग) श्रुत्वा<br>(v) विद्वत्वं च **नृपत्वं** च नैव तुल्यं कदाचन।<br>(क) त्व (ख) त्वत् (ग) त्वम् | **1x4=4** |
| **4.** | **वाच्यस्य नियमानुगुणम् उचितं विकल्पं चिनुत। (केवलं प्रश्नत्रयम्)**<br>(i) प्रियंका – रोहित! …….. किं पठसि?<br>(क) त्वम् (ख) अहम् (ग) त्वया<br>(ii) रोहितः - मया संस्कृतस्य पुस्तकम् …….।<br>(क) पठ्यते (ख) पठामि (ग) पठसि<br>(iii) प्रियंका – उत्तमम्! तव ………….. शुद्धं वर्तते।<br>(क) श्लोकोच्चारणः (ख) श्लोकोच्चारणम् (ग) श्लोकोच्चारण<br>(iv) आम्! प्रतिदिनम् ………. श्लोकोच्चारणस्य अभ्यासः क्रियते। | **1x3=3** |

| | | |
|---|---|---|
| | (क) अहम्  (ख) त्वम्  (ग) मया | |
| **5.** | **प्रदत्तेभ्यः विकल्पेभ्यः समुचितं कालबोधकशब्दं चिनुत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) छात्राः 7:15....... विद्यालयं गच्छन्ति।<br>(क) सपादसप्तवादने (ख) सार्धसप्तवादने (ग) पादोनसप्तवादने<br>(ii) प्रातः 7:30....... सामूहिकप्रार्थनासभा भवति।<br>(क) पादोनसप्तवादने (ख) सार्धसप्तवादने (ग) सपादसप्तवादने<br>(iii) मध्याह्ने 12:10......... भोजनावकाशः भवति।<br>(क) दशोनद्वादशवादने (ख) दशाधिकद्वादशवादने (ग) दशद्वादशवादने<br>(iv) पुनः मध्याह्ने 1:45 ................. संगीतकक्षा भवति।<br>(क) सपाद-एकवादने (ख) सार्ध-एकवादने (ग) पादोन-द्विवादने<br>(v) सायं 3:00........ अवकाशः भवति।<br>(क) त्रयवादने (ख) त्रीवादने (ग) त्रिवादने | **1x4=4** |
| **6.** | **वाक्यानुगुणम् उचिताव्ययपदं चिनुत - (केवलं प्रश्नत्रयम्)**<br>(i) ....... परीक्षा भविष्यति।<br>(क) ह्यः (ख) श्वः (ग) गतदिने<br>(ii) अहं ........ भोजनं कृतवान्।<br>(क) श्वः (ख) अद्य (ग) ह्यः<br>(iii) तदेवाहुः महात्मानः समत्त्वम् ................. तथ्यतः।<br>(क) यथा (ख) अत्र (ग) इति<br>(iv) रे रे धुर्त त्वया दत्तं मह्यं व्याघ्रत्रयं ................।<br>(क) सदा (ख) कदा (ग) पुरा | **1x3=3** |
| **7.** | **अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्धपदं विकल्पेभ्यः चिनुत- (केवलं प्रश्नत्रयम्)**<br>(i) माता शाकं **पचन्ति।**<br>(क) पचसि (ख) पचति (ग) पचतः<br>(ii) लता **मधुरः** गीतम् गायति।<br>(क) मधुरा (ख) मधुरम् (ग) मधुराणि<br>(iii) त्वम् प्रातः स्नानं कृत्वा जलपानं **कर**।<br>(क) कुरु (ख) करोमि (ग) करिष्यति<br>(iv) आवाम् उद्याने भ्रमणं **करोमि**।<br>(क) करोषि (ख) कुर्मः (ग) कुर्वः | **1x3=3** |
| | **पठितावबोधनम्** | |

| | | |
|---|---|---|
| 8. | **रेखांकित-पदानि आधृत्य समुचितं प्रश्नवाचकपदं चिनुत - (केवलं प्रश्नपञ्चकम्)**<br>(i) न्याधीशेन पुनस्तौ **घटनाया:** विषये वक्तुमादिष्टौ।<br>(क) कस्य (ख) कस्याः (ग) केन<br>(ii) **एवं** प्रकारेण बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्।<br>(क) कः (ख) केन (ग) किम्<br>(iii) **हरिततरूणां** ललितलतानां माला रमणीया।<br>(क) कस्य (ख) कयोः (ग) केषाम्<br>(iv) कश्चित् कृषकः बलीवर्दाभ्यां **क्षेत्रकर्षणं** कुर्वन्नासीत्।<br>(क) कम् (ख) किम् (ग) केन<br>(v) पिता यच्छति **पुत्राय** बाल्ये विद्याधनम् महत्।<br>(क) कस्याः ( ख) कस्मै (ग) काय<br>(vi) अवक्रता यथा चित्ते तथा **वाचि** भवेद् यदि।<br>(क) काचि (ख) कस्य (ग) कस्मिन् | **1x5=5** |
| 9. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चिनुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) **दुर्वहम्** अत्र जीवितं जातं प्रकृतिरेव शरणम्।<br>(क) दुष्टम् (ख) दुष्करम् (ग) वृक्षम्<br>(ii) कज्जलमलिनं धूमं **मुञ्चति** शतशकटीयानम्।<br>(क) त्यजति (ख) वितरति (ग) भ्रमति<br>(iii) **अवक्रता** यथा चित्ते तथा वाचि भवेद् यदि।<br>(क) सरलता (ख) कठिनता (ग) दुर्गमम्<br>(iv) बुद्धिमती गहने **कानने** एकं व्याघ्रं ददर्श।<br>(क) उद्याने (ख) वने (ग) जन्तुशालायाम्<br>(v) कश्चित् **खगः** एव वनराजः भविष्यति।<br>(क) सिंहः (ख) गजः (ग) पक्षी | **1x4=4** |
| 10. | **भाषिककार्यसम्बद्धानां प्रश्नानां समुचितम् उत्तरं विकल्पेभ्यः चिनुत- (केवलं प्रश्नषट्कम्)**<br>(i) "अगाधजलसञ्चारी न गर्वं याति रोहितः।<br>अङ्गुष्ठोदकमात्रेण शफरी फुर्फुरायते॥" अस्मिन् श्लोके किं क्रियापदं नास्ति?<br>(क) सञ्चारी (क) फुर्फुरायते (ख) याति<br>(ii) "काकः कृष्णः पिकः कृष्णः को भेदः पिकाकयोः" अस्मिन् वाक्ये काकस्य किं विशेषणपदम्?<br>(क) कृष्णः (ख) पिकः (ग) भेदः | **1x6=6** |

| | | |
|---|---|---|
| | (iii) "काकचेष्टः विद्यार्थी एव आदर्शछात्रः मन्यते" अस्मिन् वाक्ये विशेष्यपदं किम्?<br>(क) काकचेष्टः (ख) विद्यार्थी (ग) आदर्शछात्रः<br>(iv) "अयमेकः तावत् विभज्य भुज्यताम्" अस्मिन् वाक्ये 'विभज्य' इत्यस्य किं विलोमपदं नास्ति?<br>(क) आगत्य (ख) संयोज्य (ग) योजयित्वा<br>(v) "इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः" अस्मिन् वाक्ये किं कर्तृपदम्?<br>(क) व्याघ्रमारी (ख) व्याघ्रः (ग) भयाकुलचित्तः<br>(vi) "अपत्येषु च सर्वेषु जननी तुल्यवत्सला" अस्मिन् वाक्ये माता इत्यस्य पदस्य कृते किं पर्यायपदं प्रयुक्तम्?<br>(क) तुल्यवत्सला (ख) जननी (ग) अपत्येषु<br>(vii) "बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा" अस्मिन् वाक्ये किम् अव्ययपदम्?<br>(क) बलवती (ख) तन्वि (ग) सर्वदा | |

**'आ' - भागः**

**वर्णनात्मकाः प्रश्नाः40 अङ्काः**

| अपठितावबोधनम् | | |
|---|---|---|
| **1**<br>**1** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**<br>महात्मागान्धी एकः महान् देशभक्तराजनीतिज्ञः आसीत्। सः भारताय अजीवत् भारताय एव च प्राणान् अत्यजत्। अस्य पूर्णं नाम मोहनदासकर्मचन्दगान्धी अस्ति। अस्य जन्म 1869 तमे ख्रीस्टाब्दे अक्टूबरमासस्य 2 दिनाङ्के गुजरातराज्ये पोरबन्दरनाम्नि स्थाने अभवत्। तस्य पिता कर्मचन्दगान्धी माता च पुतलीबाई आसीत्। तस्य पत्नी कस्तूरबा धार्मिका पतिव्रता च नारी आसीत्। मोहनदासः बाल्यकालादेव सत्यवादी बालकः आसीत्। सः अध्यापकानां प्रियः आसीत्। सः युवावस्थायाम् उच्चशिक्षायै आंग्लदेशम् अगच्छत्। विदेशगमनसमये मातुः आज्ञया सः संकल्पितवान् – "अहम् मद्यं न सेविष्यामि, मांसस्पर्शमपि न करिष्यामि। सर्वदा ब्रह्मचर्यम् आचरिष्यामि" इति। स्वदेशमागत्य सः देशस्य सेवायाम् संलग्नः जातः। तस्य ईश्वरे दृढः विश्वासः आसीत्। सः आंग्लशासकानां विरोधे सत्याग्रहान्दोलनम् प्रवर्तितवान्। तस्य सत्ये अहिंसायाम् च महती श्रद्धा आसीत्। भारतविभाजनेन असन्तुष्टः नाथुरामगोडसे नामकः कश्चन जनः गान्धिमहाभागम् हतवान्। अधुना अपि विविधदेशेषु महात्मागान्धि अनेकेषां जनानां कृते प्रेरणास्रोतः वर्तते। सः आधुनिकभारतस्य निर्माता तथा राष्ट्रपिता कथ्यते।<br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) आधुनिकभारतस्य निर्माता कः? | 10<br><br>(1x2=2)<br><br>(2x2=4) |

| | | |
|---|---|---|
| | (ii) कः गान्धिमहाभागम् हतवान्?<br>(iii) महात्मागान्धीमहाभागस्य पूर्णं नाम किम्?<br>**आ. पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)**<br>(i) महात्मागान्धी केषां विरोधे सत्याग्रहान्दोलनम् प्रवर्तितवान्?<br>(ii) नाथुरामगोडसे किमर्थं गान्धिमहाभागम् हतवान्?<br>(iii) विदेशगमनसमये महात्मागान्धी किं संकल्पितवान्?<br>**इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षक संस्कृतेन लिखत।**<br>**ई. यथानिर्देशम् उत्तरत- (केवल प्रश्नत्रयम्)**<br>(i) 'सः भारताय अजीवत् भारताय एव च प्राणान् अत्यजत्' इत्यस्मिन् वाक्ये कर्तृपदं किम्?<br>(क) अद्य (ख) एतानि (ग) सः<br>(ii) 'तस्य सत्ये अहिंसायाम् च महती श्रद्धा आसीत्।' अत्र '**श्रद्धा**' पदस्य विशेष्यपदं किम्?<br>(क) सत्ये (ख) अहिंसायाम् (ग) महती<br>(iii) 'जननी' इत्यस्य पदस्य कः पर्यायः अत्र प्रयुक्तः?<br>(क) मोहनदासः (ख) जनकः (ग) माता<br>(iv) अनुच्छेदे '**असत्यम्**' इत्यस्य कः विपर्ययः आगतः?<br>(क) गान्धी (ख) सत्यम् (ग) श्रद्धा | <br>(1)<br>(1x3=3) |
| | **रचनात्मक-कार्यम्** | |
| 12 | **भवान् मनोहरः आस्ति। पौष्टिकभोजनस्य महत्त्वं वर्णयन् स्वकीयं अनुजं रमेशं प्रति लिखितं पत्रं मंजूषायां प्रदत्तपदैः पूरयित्वा उत्तरपुस्तिकायां लिखत।**<br>परीक्षाभवनम्, दिल्लीतः<br>दिनाङ्कः........<br>प्रिय रमेश!<br>सस्नेहः शुभाषीशः। ह्यः जनन्याः (i).............. पत्रं मया प्राप्तम्। तेन पत्रेण अहम् (ii).......... यत् भवान् गृहनिर्मितभोजनं कर्तुम् न इच्छति। प्रतिदिनं च 'चाऊमीन-बर्गर' इत्यादि धनव्ययं कृत्वा (iii).......... बहिः आपणेषु भक्षयति। ईदृशं (iv)............ स्वास्थयाय उचितं नास्ति। यदा-कदा ईदृशम् अल्पाहारं कर्तुं शक्यते। परन्तु प्रतिदिनं त्वरित-अल्पाहारस्य भक्षणं (v)........... हानिकरं वर्तते। स्वास्थ्यरक्षणार्थं तु नियमितरूपेण (vi).......... एव ग्रहीतव्यम्। कथ्यते चापि 'स्वस्थशरीरे एव (vii)........... वासः' भवति। अतः भवान् प्रतिदिनं (viii).............. सेवनं मा करोतु। गृहनिर्मितं स्वास्थ्यवर्धकं (ix).......... | 1/2x10=5 |

| | | |
|---|---|---|
| | भोक्तव्यम्। अनेन भवान् कदापि रुग्णः न भविष्यति। भवान् (X)......... जागरूकः भवतु इति मम निर्देशः।<br>भवतः अग्रजभ्राता<br>मनोहरः | |
| | **मञ्जूषा**<br>स्वस्थमनसः, प्रेषितम्, सन्तुलितभोजनं, स्वस्वास्थ्यविषये, ज्ञातवान्, गृहात्, भोजनं, स्वास्थ्यदृष्ट्या, भोजनमेव, त्वरित-अल्पाहारस्य, | |
| **13** | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि**  **संस्कृतेन लिखत–**<br>**मञ्जूषा-**<br>कक्षा, छात्राः, श्यामपट्टः, उत्पीठिका, आसन्दः, षड्, शिक्षकः, नास्ति, कोविड-1 बिषाणुतः, रक्षणार्थम्, मुखपट्टिकाम्, प्रयुज्यते, धारयन्ति, जागरूकाः, सन्ति, | **1x5=5** |
| | **अथवा**<br>**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत –**<br>**"रेलयानम्"**<br>मञ्जूषा-<br>जेम्सवाटः, वैज्ञानिकः, आविष्कारम्, लौहपथगामिनी, वाष्पयानम्, द्रुतगामिनी, भारवाहनम्, भाटकम्, अल्पमूल्यम्, यात्रायाः, साधनम्, सुखप्रदम्, अल्पकाले, दूरम्, स्थानम्, प्रापयति, रेलयाने, जनाः, शयनम्, भोजनव्यवस्था, विक्रेतारः | 1x5=5 |
| **14** | **अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत - (केवल वाक्यपञ्चकम्)**<br>(i) तुम क्या पढ़ते हो? What do you Read. | 1x5=5 |

| | | |
|---|---|---|
| | (ii) महिलायें वस्त्र धो रही हैं। Women are washing clothes.<br>(iii) सिपाही चोर से बचाता है। Policeman protects from thief.<br>(iv) तुम शीघ्र यहाँ आओ। Come here soon.<br>(v) शिक्षक संस्कृत पढ़ाते हैं। Teacher is teaching Sanskrit.<br>(vi) तुम कब खेलते हो? When do you play.<br>(vii) सिंह जोर से गरजता है। The lion roars loudly. | |
| | **पठितावबोधनम्** | |
| 15 | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्टर्यात् पुत्रौ चपेटया प्रहृत्य जगाद - "कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।"<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) ग्रामस्य नाम किम्?<br>(ख) कः राजपुत्रः अस्ति ?<br>(ग) का पितुर्गृहं प्रति चलिता?<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) बुद्धिमती गहनकानने किं ददर्श?<br>(ख) बुद्धिमती कौ प्रहृतवती?<br>(ग) बुद्धिमती पुत्रौ किं जगाद्? | 3<br><br>(1/2x2=1)<br><br>(1x2=2) |
| 16 | **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>**कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।**<br>**वाष्पयानमाला सन्धावति वितरन्ती ध्वानम्॥**<br>**यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्।**<br>**शुचि... ॥2॥**<br>**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)**<br>(क) वाष्पयानमाला किं वितरन्ती सन्धावति?<br>(ख) कः धूमं मुञ्चति?<br>(ग) संसरणं कीदृशं जातम् ?<br>**आ. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)** | 3<br><br>(1/2x2=1)<br><br>(1x2=2) |

| | | |
|---|---|---|
| | (क) वाष्पयानमाला किं करोति?<br>(ख) का: अनन्ता:?<br>(ग) शतशकटीयानं कीदृशं धूमं मुञ्चति? | |
| 17 | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>काक: - अरे! अरे! किं जल्पसि?<br>यदि अहं कृष्णवर्ण: तर्हि त्वं किं गौराङ्ग:?<br>अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते।<br>उदाहरणस्वरूपा - "अनृतं वदसि चेत् काक: दशेत्" इति प्रकारेण।<br>अस्माकं परिश्रम: ऐक्यं च विश्वप्रथितम्। अपि च काकचेष्ट: विद्यार्थी एव आदर्शच्छात्र: मन्यते।<br>पिक: - अलम् अलम् अतिविकत्थनेन।<br>किं विस्मर्यते यत् -<br>**काक: कृष्ण: पिक: कृष्ण: को भेद: पिककाकयो:।**<br>**वसन्तसमये प्राप्ते काक: काक: पिक: पिक:॥**<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) काकस्य वर्ण: कीदृश:?<br>(ख) 'का का' इति ध्वनिं क: करोति?<br>(ग) पिकस्य वर्ण: कीदृश:?<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) किं विश्वप्रथितम् अस्ति?<br>(ख) आदर्शच्छात्र: कीदृश: मन्यते?<br>(ग) काक: कदा दशति? | **3**<br><br>(1/2x2=1)<br><br>(1x2=2) |
| 18 | **मञ्जूषात: समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत -**<br>**विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्त: प्रकीर्तिता:।**<br>**अन्येषां वदने ये तु ते चक्षुर्नामनी मते ॥**<br>**अन्वय: -** अस्मिन् (i)........... विद्वांस: एव (ii).......... प्रकीर्तिता:, (iii).......... वदने ये तु ते (iv)......... मते।<br>**मञ्जूषा-**<br>अन्येषां, लोके, चक्षुर्नामनी, चक्षुष्मन्त:,<br>**अथवा**<br>**मञ्जूषाया: साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुन: लिखत -** | (1/2x4=2)<br><br>1/2x4=2 |

| | | |
|---|---|---|
| | **विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।**<br>**अन्येषां वदने ये तु ते चक्षुर्नामनी मते ॥**<br>**भावार्थः -** अस्मिन् संसारे (i)............. एव नेत्रयुक्ताः कथ्यन्ते। अर्थात् ज्ञानम् एव (ii)........... वास्तविकं नेत्रम् वर्तते। यस्य मानवस्य (iii)............ रुचिः न भवति; तस्य नेत्रद्वयं तु केवलं (iv)......... वर्तते।<br>**मञ्जूषा-**<br>शोभामात्रमेव, विद्यार्जने, मनुष्याणां, विद्वज्जनाः | |
| 19 | **अधोलिखित-कथांशं समुचित-क्रमेण लिखत -**<br>(i) वानराः हसन्ति?<br>(ii) किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा?<br>(iii) क्रुद्धः सिंहः तं प्रहर्तुं इच्छति।<br>(iv) क्रुद्धः सिंहः इतस्ततः धावति।<br>(v) तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति।<br>(vi) वनस्य समीपे एका नदी वहति।<br>(vii) पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति।<br>(viii) अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति। | 1/2x8=4 |